National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2015; 1(2): 76-79
© 2015 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# कविः तत्कर्म काव्यञ्च

**आचार्यः जि. पद्मनाभम्**

**सारांशः -** ननु शब्दार्थमयं वाङ्मयं विश्वस्य किमपि विलक्षणं तत्त्वमस्ति, यत् मानवाभिप्रायान् आविष्कुर्वत् जगति व्यवहारस्य ग्रन्थस्य च सेतुं बध्नाति। संस्कृतपरम्परायाम् एषा भाषा केवलं विनिमयस्य साधनं न भूत्वा 'साहित्य'पदेन अलङ्कृता सती मानवानन्दस्य अक्षयकोशः संवृत्ता। यद्यपि लोके ज्ञानस्य विविधाः शाखाः सन्ति, तथापि काव्यशास्त्रस्य महत्त्वं विशिष्टमेव, यतोहि अत्र शब्दार्थयोः तादृशं सामञ्जस्यं वर्तते यत् सहृदयहृदयेषु कमपि लोकोत्तरम् आह्लादं जनयति।
काव्यस्य अस्मिन् विशाले प्रपञ्चे कवेः स्थानं सृष्टिकर्तुः ब्रह्मणः सदृशं मन्यते। सः न केवलं द्रष्टा अपितु वर्णनानिपुणः सन् स्वकीयायाः नवनवोन्मेषशालिन्याः प्रतिभायाः साहाय्येन अपारं काव्यसंसारं रचयति। तस्य इयं रचना नैकेभ्यः प्रयोजनेभ्यः कल्पते—कदाचित् यशसे, कदाचित् व्यवहारज्ञानाय, कदाचित् च कान्तासम्मिततयोपदेशाय।
अस्मिन् शास्त्रे आचार्यैः शब्दार्थयोः स्वरूपं, काव्यस्य लक्षणानि, तस्य भेदाः च अतिसूक्ष्मधिया विचारिताः। गद्यं वा भवतु पद्यं वा, उभयमपि कवेः प्रज्ञायाः निकषोपलं वर्तते। संस्कृतसाहित्यस्य इयं सुदीर्घा यात्रा मानवकल्याणाय, रसानुभूतये, सदाचारप्रतिष्ठापनाय च सततं प्रवहन्ती अस्ति। एतादृशस्य गौरवपूर्णस्य साहित्यस्य तस्य आधाराणां च परिशीलनं न केवलं विद्वत्परितोषाय, अपितु संस्कृतविद्यायाः प्रकर्षाय अपि अनिवार्यं वर्तते।

***कूटशब्दाः – साहित्यम्, प्रतिभा, क्रान्तदर्शी, कान्तासम्मितत्वम्, सद्यःपरनिर्वृतिः, शक्तिः, व्युत्पत्तिः, ध्वनिः, गद्यनिकषः, रमणीयता।***

"भाष व्यक्तायां वाचि" इति धातोः निष्पद्यते भाषा शब्दः। आशय- विनिमयोपयोगिन्याः वर्णनात्मकशब्दरूपायाः अस्याः भाषायाः व्यावहारिकः ग्रान्थिकश्चेति द्वौ भागौ स्तः। व्यवहारिको विभागः जनसमुदायस्य आवश्यकाभिप्रायाविष्करणरूपः भवति । ग्रन्थसम्बन्धस्तु न केवलम् आशयम् आविष्करोति मनुष्यहृदयस्यानन्दमपि ददाति ततश्च तस्य विभागस्य साहित्यमिति व्यवहारः सम्भवति। किं नाम साहित्यमिति विचारयिष्यते ।

**साहित्यं –** यद्यपि सम्प्रति साहित्यशब्दो वाङ्मयमित्यर्थे प्रयुज्यते यत्रार्थे Literature शब्दो वैदेशिकैः प्रयुज्यते । परन्तु संस्कृतभाषायां साहित्य- शब्दस्य शब्दार्थौ इत्यर्थः । सहितयोर्भावः साहित्यम् । सहितयोः तयोः शब्दार्थयोः तच्च साहित्यं क्वचिदन्येषु शास्त्रेषु न भवति, किन्तु काव्यशास्त्र- भावः । तत्र हि शब्दार्थयोः मेलनेनैव कमपि आल्हादं जनयति न केवलं शब्दो नापि वा केवलोऽर्थः तथा चोक्तमपि व्यक्तिविवेकटीकायाम् –

"न च काव्यशास्त्रादिवत् अर्थप्रतीत्यर्थं शब्दमात्रं प्रयुज्यते । सहितयोः शब्दार्थयोः तत् प्रयोगात् साहित्यं तुल्यकक्ष्यत्वेन अन्योनातिरिक्तवृत्तित्वम्" ।[1]इति ।

एतेन शब्दार्थयोः सम्मेलनमेव काव्यशब्दस्यार्थः ज्ञायते । अपि च राजशेखरेणोक्तं काव्यमीमांसायाम् - "शब्दार्थयोः यथावत् सहभावेन विद्या साहित्यविद्या"[2] इति आधुनिकप्रथानुसारेण

तु सर्वासामपिविद्यानां साहित्यपदाभिलप्यत्वे काव्यमात्रपरकत्वेन साहित्यशब्दप्रयोगोऽयुक्तः स्यात् । किञ्च विल्हणेन -

**साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ।**

**यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति।।**[3]

इति प्रोक्तम् । तदपि साहित्यशब्दस्य काव्यार्थतां व्यञ्जयति। साहित्यदर्पणम्, साहित्यरत्नाकरः, साहित्यचिन्तामणि, साहित्यसारः इत्यादि काव्यलतास्वरूपादीनां बोधग्रन्थानां नामकरणमपि साहित्यशब्दस्य प्रयोगं समापयति ।

तदित्थं साहित्यशब्दोऽत्र काव्यमात्रपरक इति प्रतिपत्तव्यं अपि च "सहितं रससम्युक्तं तदेव साहित्यम्" इति। हितेन निरतिशयप्रेमास्पदेन रसेन सहितं तदेव साहित्यमिति, च नवीनैः साहित्यशब्दस्य व्युत्पत्तिः कथिता इति श्रीमता सन्निधानंसूर्यनारायणशास्त्रिणोक्तम्[4] । साहित्यशब्दः काव्यमात्रपरकः इत्युक्तमेव तत्तावत्किं नाम काव्यं, तस्य लक्षणं किम्, इत्यत्र विचारयामः ।

**काव्यं तल्लक्षणञ्च -**

काव्यलक्षणकथनात् पूर्वं को नाम कविः ? इति विषयमुद्दिश्य परिशीलयामः । सर्वप्रथमं कविर्मनीषी परिभूः स्वयम्भूः इति कविशब्दः परमात्मपरतया वैदिकप्रान्तेषु दृश्यते । तत् कतिपदं क्रमेण परमात्मनः साक्षात्कारं प्राप्तवतः ऋषेः परतया व्यवह्रियते स्म । साक्षात् द्रष्टारः ये वैदिकाः ऋषयः सन्ति स्म ते कवयः, तेषां काव्यानि उपनिषदः इति प्रन्थाः आसन् । आद्याः वैदिककवयः लौकिकाश्च वाल्मीकिव्यासादयः ऋषयः सन्ति तैः दिव्यदृष्ट्या लोकरहस्यं ज्ञातत्वात् तेषां काव्यानि लोकोत्तरवर्णनात्मकानीति प्रसिद्धिं प्राप्तगता च "नानृषिः कुरूते काव्यं कवयः क्रान्तदर्शिनः" इति लोकोक्तिः ।

किन्तु न केवलमृषिः काव्यं निर्माति, भट्टतौतस्य त्रयः श्लोकाः हेमचन्द्रेण सङ्ग्रहिताः इति शिरोमणिरयम् सूर्यनारायणशास्त्रि-महाभागः कथयति।[5]

**नानृषि कविरित्युक्तमृषिश्च किल दर्शनात् ।**
**विचित्रभावधर्मांशतत्त्वप्रख्याश्च दर्शनम् ।।**
**सत्तत्त्वदर्शनादेव शास्त्रेषु पठितः कविः ।**
**दर्शनाद्वर्णनाच्चाथ रूढा लोके कविश्रुतिः ।।**
**तथाहि दर्शने स्वच्छे नित्येऽप्यादिकवेर्मुनेः ।**
**नोदिता कविता लोके यावज्जाता न वर्णना ।।**[6]

स्वयं द्रष्टा अपि वाल्मीकिः रामायणवर्णनस्याननन्तरमेव कविरिति ख्यातिं प्रापेति सर्वविदितप्रायमेव । अतो ज्ञायते कविः द्रष्टा वर्णना निपूणश्च भवेदिति । अयमेवाभिप्रायः भामहेन प्रतिपादितः –

**प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ।**
**तदनुप्राणनाज्जीवेत वर्णनानिपुणः कविः ।।**[7]

आनन्दवर्धनः कविमुद्दिश्य एवं वदति –

**अपारे काव्यसंसारे कविरेव प्रजापतिः ।**
**यथास्मै रोचते विश्वं तथैच परिकीर्त्यते ।।**
**श्रृङ्गारी चेत्कविः काव्ये जातं स्ममं जगत् ।**
**स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ।।**
**भावानचेतनानपि चेतनानचेतनवत् ।**
**व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया ।। इति ।**[8]

उपर्युक्तयोः उक्त्योः एकवाक्यत्वं प्रतिपाद्यते चेत् प्रतिभावान् कविः काव्यप्रपञ्चस्य सृष्टिकर्ता ब्रह्मा इति फलितार्थो भवति । अत एव - "काव्यं तु जातु जायेत कस्यचित् प्रतिभावतः"[9] इति भामहोक्तवाचोयुक्तिः समीचीना आदरणीया च भवति । क्रान्तदर्शी प्रतिभावान् वर्णनानिपुणश्च यो भवति स एव कविरिति सिद्धम् ।

कविं काव्यलक्षणं चोद्दिश्य कथयता श्रीमता सूर्यनारायणशास्त्रिणा केषाञ्चित् आलङ्कारिकाणां मतानि प्रतिपादितानि ।[10]

**"कवनीयं काव्यमि"ति** लोचनकारः अभिनवगुप्तः ।

**"कवयतीति कविः तस्य कर्म काव्यम्"** इति विद्याधरः ।

**"कौति शब्दायते विस्मृशति रसभावान् इति कविः तस्य कर्म काव्यमि"**ति भट्टगोपालः ।

**"लोकोत्तरवर्णनानिपूणं कविकर्म काव्यम्"** इति मम्मटः ।

अत्रोक्तानि वाक्यानि सर्वाण्यपि कविकर्म ज्ञापयन्ति एतैर्वाक्यैः कविलक्षणमपि ज्ञातुं शक्यते। उक्तेषु वाक्येषु लोकोत्तरवर्णनानिपुणकविकर्म काव्यम् इत्यस्मात् ज्ञायते लोकोत्तरवर्णनानिपुण एव कविरिति । पूर्वोक्तैरन्यैः वाक्यैः सम्यक्तया न प्रतिपाद्यते। किन्तु तस्य तात्पर्यं ज्ञातं भवति। तस्यैतादृशलोकोत्तरवर्णनानिपुणत्वं प्रतिभालक्ष्यं भवति ।

प्रतिभा तु देवतानुग्रहसम्पादनीया अस्ति । देवतानुग्रहस्तु तपोभिः सम्पादयितुं शक्यः । तपः ऋषिकर्म विद्यते । ततः एव **"नानृषिः कुरुते काव्यम्", "कवयः क्रान्तदर्शिनः"** इति लोकोक्तिः । तादृशः ऋषिकल्प एव महाकविः ।

शास्त्रकविः, काव्यकविः, उभयकविश्चेति कवयस्त्रिविधाः दृश्यन्ते । तेषु उत्तरोत्तरश्रेष्टो भवति। उभयकविरेव विद्वत् कविरिति व्यवह्रियते।

"विद्वत्कवयः", "कवयः केवलं कवयस्तु" "केवलं कपयः" इति वाचोयुक्तिरपि विधते । अर्थात् प्रतिभा व्युत्पत्तिः इति द्वेऽपि यस्य स्तः स एव विद्वत्कविः । तथाभूतः कविरेव लोकोत्तरवर्णना निपुण इति विदुषामभिसन्धिः ।

कवित्वकरणे दोषो नास्ति । किन्तु कुकवित्वं मा कर्तव्यं, तन्मरणसदृशम् इति भामहोक्तिः ।

**अकवित्वं न धर्माय व्याप्तये दण्डनाय वा ।**
**कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः ।।**[11]

एषा भामहोक्तिरपि व्युत्पन्नं विद्वत्कविमेव कविरिति वर्णयति ।

विद्वत्कवयः एव **"महाकवयः"** इति कथ्यन्ते । महाकवीनां संख्या न्यूना एवास्ति । आनन्दवर्धनाचार्येणापि उच्यते - येनास्मिन् अतिविचित्रकविपरम्परा-वाहिनि संसारे कालिदासप्रभृतयः द्वित्राः पञ्चधा वा महाकवयः इति गण्यन्ते ।[12]

अथ काव्यलक्षणमङ्गिगकृत्य किञ्चिद्विवेचयामः। काव्यलक्षण-मुद्दिश्य बहवो आलङ्कारिकाः बहुप्रकारेणावोचन् । तत्र तावत् प्रसिद्धानां आलंकारिकाणां केषाञ्चन काव्यलक्षणानि मया अत्र विमृश्यन्ते ।

**"शब्दार्थौ सहितौ काव्यम्"[13]** इति भामहो वदति। अस्यायमभिप्रायः । न शब्द एव केवलं काव्यम्। नाप्यर्थ एव । किं तर्हि ? उभौ शब्दार्थौ सहितौ काव्यम्। वाचको वाच्यश्च द्वौ सम्मिलितौ काव्यम् । द्वावेकमिति विचित्रोक्तिः। तेन यत् केषाञ्चिन्मतं कविकौशलकल्पितकमनीयातिशयः शब्द एव केवलं काव्यमिति केषांचित् वाच्यमेव रचनावैचित्र्यचमत्कारि काव्यमिति पक्षद्वयमिति निरस्तमिति । तिलेषु यथा तैलं विद्यते तद्वत् द्वयोः शब्दार्थयोः आह्लादकारित्वं वर्तते । न पुनरेकस्मिन् इति ।

"काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते"[14] । इत्यनेन वामनाचार्योऽपि गुणालङ्कारयुक्तशब्दार्थौ काव्यमिति प्रतिपादयति । अस्यायं धर्मः - गुणालङ्कारसंस्कृतशब्दार्थयुगलवाचि नपुंसकलिङ्गकाव्यशब्दः ओजःप्रमुखैः गुणैः यमकोपमादिभिरलंकारैः अलङ्कृतयोः सहितयोः शब्दार्थयोः युक्तवाची भवति । अत्र शब्दार्थौ द्वौ सहितावेव काव्यमिति काव्यपदार्थकथनात् कमनीयताशाली शब्दः एव काव्यम् । अथवा अर्थ एवेति पृथक् पक्षद्वयं प्रत्यक्षेऽपि, यतो द्वयोः सम्भूयाह्लाद- निबन्धनत्वमिति फलितांशः ।

**"तददोषौशब्दार्थौसगुणावनलंकृति पुनः क्वापि"**[15] इति आचार्यमम्मटः भणति ।

अत्रायं अभिसन्धिः – शब्दार्थौ शब्दार्थयुगलं तत् काव्यम् । आस्वादव्यञ्जकत्वस्योपयत्नेऽपि काव्यं पठितम्, श्रुतं, गीतं रचितं बुद्धम् इति व्यवहारदर्शनेन च शब्दार्थयुगलस्य काव्यत्वं स्फुटमिति भावः । काव्यत्वविघटकाः ये च्युतसंस्कारादयः प्रबलदोषाः तद्रहिताः माधुर्योजःप्रसादाख्याः ये गुणाः तत्सहितौ अपि च सर्वत्रालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहावपि शब्दार्थै काव्यमिति सिद्धार्थः ।

**"शरीरं तावत् इष्टार्थव्यवच्छिन्नापदावली काव्यं इति"[16]** महाकविः दण्डी काव्यलक्षणं निजगाम। अत्रायं भावः तावदिति पदं काव्यालङ्करणाय प्रयुज्यमानं बोध्यम् । इष्टाः अभिलषिताः सरसतया मनोहरतया च वर्णयितुं उद्दिष्टाः ये अर्थाः कविप्रतिभाफलिताः सुन्दराः पदार्थाः तैः व्यवच्छिन्ना युक्ता पदावली शब्दसमूहः शरीरं काव्यशरीरम् । इष्टार्थः पदसमुदायः काव्यमिति यावत् । अपि च उपर्युक्तैः सह इतरसुप्रसिद्धालङ्कारिकाणां काव्यलक्षणानि कानिचन अत्र दीयन्ते ।

**"निर्दोषं गुणालङ्काररसवत् वाक्यं काव्यम्"** । इति भोजः ।

**"गुणालङ्काररीतिरसोपेतः साधुशब्दार्थसन्दर्भः काव्यं"।**[17] इति वाग्भटः ।

**"निर्दोषं गुणालङ्काररीतिवृत्तिमद्वाक्यं काव्यम्"** ।[18] इति पियूषबर्धनः ।

**"रसादिमत् वाक्यं काव्यं"** । इति शौद्धोदनिः ।

**"वाक्यं रसात्मकं काव्यम्"।** इति विश्वनाथः ।

**"रमणीयार्थ प्रतिपादक शब्दं काव्यमिति"।** जगन्नाथपण्डितराजः ।

**"रसालङ्कार युक्तं सुखविशेषसाधनं वा काव्यं"।** इति केशव मिश्रः।

उक्तेषु प्रसिद्धालङ्कारिकेषु जगन्नाथपण्डितः अर्वाचीनः । अनेन निगदितं काव्यलक्षणं रमणीयम्, आदरणीयं चास्ति । अयं पूर्वेभ्यो आलङ्कारिकेभ्यः प्रोक्तानि सर्वाणि काव्यलक्षणानि खण्डयता स्वमतं सुष्ठु प्रत्यपादयत् च । अनेनोक्तकाव्यलक्षणं तदानीन्तनैः तदन्तरागतैः सुप्रसिद्धालङ्कारिकैः अनुमोदितमस्ति । तेनोक्तकाव्यस्वरूपमुद्दिश्य परिशीलयामः ।

**"रमणीयार्थप्रतिपादकशब्दः काव्यम्"** इति तस्य काव्यलक्ष्यणस्य ये अर्थाः वाच्यव्यङ्ग्यरूपाः, तत्प्रतिपादकः, तद्विषयकबोधजनकः, शब्दः सुप्तिङ्गन्तरूपः काव्यमित्यर्थः ।

अस्मिन् लक्षणे कटाक्षादिवारणाय "शब्द"पदं व्यङ्ग्यादिसंग्रहाय **"प्रतिपादक",** वाच्य-लक्ष्य- व्यङ्ग्यात्मकत्रिविधार्थसंग्रहाय वाचकः, लक्षकः, व्यञ्जक इति वा अनुक्त्वा प्रतिपादक इत्युक्तं पदम् । रमणीयशब्दप्रतिपादके व्याकरणादौ अतिव्याप्तिनिराशाय अर्थपदम्, घटमानय इत्यादिवाक्यव्यावृत्तये रमणीयपद्यमिति बोध्यम् ।

मम्मटविश्वनाथजगन्नाथाः त्रयोऽपि आनन्दवर्धनेन प्रतिपादितस्य ध्वनिसिद्धान्तस्य अनुकूल- वादिनः एव सन्ति । त्रयाणां मते ध्वनिरेव काव्यस्यात्मा भवति ।

अस्माकं शास्त्रदृष्ट्या पाश्चात्त्याः विमर्शकाः शास्त्रकाराः न भवन्ति । किन्तु विमर्शनाविषये अनुभवशालिनः सन्ति । अपि च वैदुष्यपरीक्षासु प्रामाणिकाः विद्यावेत्तारश्च वर्तन्ते ।

एवं निष्कर्षरूपेण वक्तुं शक्यते यत् कविप्रणीतं काव्यं केवलं शब्दक्रीडा नास्ति, अपितु मानवकल्याणस्य परमसाधनं वर्तते। काव्यस्य प्रयोजनेषु **'कान्तासम्मितत्वं'** सर्वाधिकं महत्त्वपूर्णम् अस्ति, यतोहि काव्यं न तु वेदवत् आदेशं ददाति, न च पुराणवत् उपदेशं, अपितु प्रियतमेव सरसविधेन सदाचारं बोधयति । मम्मटादिभिः निर्दिष्टं **'सद्यःपरनिर्वृतिः'** (तत्क्षणमेव आनन्दानुभूतिः) काव्यस्य सकलप्रयोजनमौलिभूतं फलमस्ति।

काव्यस्य उत्पत्तौ **शक्तिः (प्रतिभा), निपुणता, अभ्यासः** च इति त्रयः मिलित्वा 'हेतु'त्वेन वर्तन्ते। एतेषां समन्वयेनैव कश्चित् कविः लोकोत्तरवर्णनानिपुणं काव्यं स्रष्टुं शक्नोति ।

गद्यकाव्यस्य सन्दर्भे **'गद्यं कवीनां निकषं वदन्ति'** इति उक्तिः

गद्यलेखनस्य काठिन्यं वैशिष्ट्यं च प्रकटयति । यद्यपि पद्यं सुलभं भाति, परन्तु पदबन्धसौष्ठवेन रसनिष्पत्तिं कारयितुं गद्यमेव कवेः वास्तविकं सामर्थ्यं परीक्षते । दण्डि-भामहादिभिः प्रतिपादितं कथा-आख्यायिकादिभेदं गद्यकाव्यस्य वैविध्यं दर्शयति ।

अतः सिद्धं भवति यत् संस्कृतसाहित्ये गद्यं वा पद्यम्, उभयमपि पुरुषार्थचतुष्टयसिद्धये तथा ब्रह्मानन्दसहोदरस्य अलौकिकानन्दस्य प्राप्तये अनिवार्यं माध्यमं वर्तते । सुकविना विरचितं काव्यमेव समाजे सदाचारस्य प्रतिष्ठां करोति ।

**।। सहायकग्रन्थसूची ।।**


१)संस्कृतसाहित्येतिहासः, आचार्यरामचन्द्रमिश्रः, चौखम्बा विद्याभवन, वाराणसी

२) काव्यालङ्कारसङ्ग्रहमु (Telugu), वाविल्ला रामस्वामी शास्त्रुलु एण्ड सन्स,. चेन्नपुरी (Chennai)

३)विक्रमाङ्कदेवचरितम्, विल्हणः, चौखम्बा संस्कृत सीरीज, वाराणसी

४) काव्यालङ्कारः, भामहः, मोतीलाल बनारसीदास, दिल्ली

५)ध्वन्यालोकः, आनन्दवर्धनः, कुप्पुस्वामी शास्त्री रिसर्च इन्स्टीट्यूट, वाराणसी / चेन्नई

६)काव्यालङ्कारसूत्रवृत्तिः, वामनः, चौखम्बा संस्कृत संस्थान, वाराणसी

७) काव्यप्रकाशः, मम्मटः, भारतीय विद्या प्रकाशन, दिल्ली

८) काव्यादर्शः, दण्डी, राजकीय प्राच्य हस्तलिखित ग्रन्थागार, मैसूर

९) सरस्वतीकण्ठाभरणम्, भोजराजः, चौखम्बा संस्कृत सीरीज, वाराणसी

१०) वाग्भटालङ्कारः, वाग्भटः, निर्णयसागर प्रेस, मुम्बई

११)काव्यकौतुकम्, भट्टतौतः, (उद्धरणरूपेण उपलभ्यते) गायकवाड़ ओरिएण्टल सीरीज, वडोदरा ।


**संदर्भः**

1 संस्कृतसाहित्यइतिहासः पुट-4 (आचार्यरामचन्द्रमिश्र, चौखम्बा विद्याभवन्, वारणासी-1978)

2 काव्यालङ्कारसङ्ग्रहमु (Telgu) पुट-8

3 विक्रमाङ्कदेवयस्तिं, पुट-9

4 काव्यालङ्कारं (Telgu) पुट-31

5 काव्यालङ्कारसंग्हमु, पुट-89

6 काव्यकौतुकम्, भट्टतौतस्य

7 काव्यालङ्कारः (भामह)

8 ध्वन्यालोकः पुट-53

9 काव्यालङ्कारः पुट-3

10 काव्यालङ्कारसङ्ग्रहमु (Telgu) पुट-90

11 काव्यालङ्कारः पुट-5

12 ध्वन्यालोकः पुट-94

13 काव्यालङ्कारः पुट-8

14 काव्यालङ्कारसूत्रवृत्ति, पुट-3

15 काव्यप्रकाशः

16 काव्यादर्शः, पुट-6

17 सरस्वतीकण्ठाभरणम्

18 वा--रालङ्कारः